**बद्धगुद** न० बद्धं गुदमत्र । कोष्ठबन्धकारके रोगभेदे “यस्या-न्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा पिहितं यथावत् । सञ्चीयते तस्य मलः सदोषात् शनैः शनैः सङ्करवच्च नाड्याम् । निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् । हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति” भावप्र० ।

**बद्धफल** पु० बद्धानि फलान्यस्य । करञ्जवृक्षे राजनि० ।

**बद्धमुष्टि** त्रि० बद्धः दानायाप्रसारितो मुष्टिर्यस्य । कृपणे ।

**बद्धमूल** त्रि० बद्धं मूलमस्य । दृढमूले ।

**बद्धरसाल** पु० नि०क० । राजाम्रभेदे राजनि० ।

**बद्धशिख** त्रि० बद्धा शिखा येन यस्या वा । “सदोपवीतेन भाव्यं सदा बद्धशिखेन च” प्रा०त०उक्ते १शिखाबन्धन-युक्ते २उच्चटायां स्त्री मेदि० ।

**बध** पु० हन-वध । वधादेशः । हनने प्राणवियोगसाधने व्यापारे अमरः । बधपदार्थविशेषं बधिभेदश्च प्रा० वि० उक्तो यथा

“अथ बधो निरूप्यते । ननु कोऽयं बधः किं बधित्वं कति विधं च तत्, ? उच्यते प्राणवियोगफलकव्यापारो बधः तन्नि-ष्पादकत्वञ्च साक्षात्परम्परोदासीनं स्मृतिकारपरिगणितं बधित्वम् अतो नेषुकारादिष्वतिव्याप्तिः तच्च पञ्चविधं स्मृतिस्वरसात् कर्त्ता प्रयोजकोऽनुमन्ता अनुग्राहको निमित्ती चेति यथाह आपस्तम्बः “प्रयोजयिता अनुमन्ता कर्त्ता चेति सर्वे स्वर्गनरकफलभोक्तारो यो भूय आरभते तस्मिन् फले विशेषः” । अनुग्राहकमाह याज्ञ-वल्क्यः “चरेद्व्रतमहत्वापि घातार्थञ्चेत् समागतः” । तथा मनुः “बहूनामेककार्य्याणां सर्वेषां शस्त्रधारिणाम् । यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः” । भविष्ये “यद्येकं बहवो विप्रा घ्नन्ति विप्रमनागसम् । तदेषां निष्कृतिं वक्ष्ये शृणुष्वैकमना गुह ! । तेषां यस्य प्रहा-रेण स विप्रो निधनं गतः । सरस्वतीं प्रतिस्रोतः सञ्च-रेत् पापशुद्धये” । स च द्विविधः । एको बध्यप्रति-रोधकः अन्यः स्वल्पप्रहर्त्ता । निमित्तिनमाह विष्णुः “अन्यायेन गृहीतस्वो न्यायमर्थयते तु यः । यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्” । अत्र नरान्तर-व्यापाराव्यवधानेन बधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः सोऽपि द्विविधः । एकः स्वतो-ऽप्रवृत्तमेव पदातिं वेतनादिना बधार्थं प्रवर्त्तयति अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति । अनुमतिदाता अनुमन्ता । अनुमतिश्च द्विविधा । एका यद्विरोधाद्धननं न सम्भवति तस्य विरोधिनो मया नि-रोधः कर्त्तव्य इति प्रयुक्तिः । अपरा एनं हन्मीति वचने शक्तस्याप्रतिषेध एव” । हिंसायाः पापाद्यनिष्टजनक-त्वेऽपि वैधहिंसाया इष्टफलजनकत्वात् नानिष्टजन-कता “यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे बधोऽबधः” ति० त० उक्तेः मनुनापि “या वेदविहिता सा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्यात् वेदात् धर्मो हि निर्बभौ” उक्तेश्च । अवैधः अहिंसा च तज्जन्यपापाजनकत्वेन तद्विरो-धीत्यर्थः । बहूनां रक्षणार्थमेकस्य बधेऽपि पुण्यजनकत्व-मुक्तम् “एकस्य यत्र निधने प्राप्ते दुष्टकारिणः । बहूनां भवति क्षेमं तस्य पुण्यप्रदो बधः । कृतघ्नो यो सुरापश्च ब्रह्महा गुरुतल्पगः । आत्मानं घातयेद्यस्तु तस्य पुण्य-प्रदो बधः” कालिका०२०अ० । ब्रह्महन्तृबधेऽपि न राज्ञो दोषः प्रा०वि०स्थितः “तथा नाततायिबधे दोषो हन्तुर्भवति कश्चन” स्मृतेः आततायिबधेऽपि नानिष्टफलमिति यथायथं बोध्यम् ।

**बध** संयमने चु०उ०सक०सेट् । बाधयति-ते अबीबधत्-त ।

**बध** निन्दायां बन्धने च भ्वादि०आत्म०सक०सेट् । बीभत्सते अबीभत्सिष्ट । निन्दनेऽर्थे एव स्वार्थे सन् बन्धने तु न तेन तत्र बधते अबधिष्ट इत्येव ।

**बधक** त्रि० बध-क्वुन । १बधकर्त्तरि त्रि० कौ० । २हिंस्रे ३व्याधौ ४मृत्यौ च संक्षिप्तसा० ।

**बधत्र** न० बध-करणे कत्रन् । अस्त्रे उणादि० । [हारा० ।

**बधस्थली** स्त्री ६त० । श्मशाने त्रिका० । बधस्थानमप्यत्र न०

**बधाङ्कक** न० बधः अङ्कमत्र कप् । काराकृहे त्रिका० ।

**बधार्ह** त्रि० बधमर्हति अर्ह-अण् उ०स० । बधदण्डार्हे ।

**बधिर** त्रि०बन्ध-किरच् । श्रोत्रेन्द्रियरहिते श्रवणशक्तिशून्ये । तस्यानंशिता मनुनोक्ता यथा “अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा” । ततः अरीहणा० चतुरर्थ्यां वुञ् । बाधिरक तन्निकटदेशादौ त्रि० । ततः दृढा०भावे वा इमनिच् पक्षे ष्यञ् । बधिरिमन् पु० बाधिर्य्यं न० तद्भावे तन्निदानादि माधवकरेणोक्तं यथा “यदा शब्दवहं वायुः स्रोतस्यावृत्य तिष्ठति । शुद्धः श्लेष्मा-न्वितो वापि बाधिर्य्यं तेन जायते” ।

**ब(व)धू** स्त्री बध्नाति प्रमतया बन्ध-ऊ नलोपः, उह्यते वह-ऊ धश्चान्तादेशो वा । १भार्य्यायाम्, २पुत्रभार्य्यायाम् अमरः